[1]जानन्[A]-ती, [मातुः] [2]सञ्जानन्, [पितुः] प्रतिजानन्, [स्वां गां] [3]जानन्, ज्ञापयन्-ज्ञपयन्-न्ती, जिज्ञपयिषन्-ज्ञीप्सन्-न्ती, [पुत्रं] [4]अनुजिज्ञासन्[B]-न्ती; ज्ञास्यन्-न्ती-ती, ज्ञापयिष्यन्-न्ती-ती, जिज्ञपयिषिष्यन्-न्ती-ती, ज्ञीप्सिष्यन्-न्ती-ती, [पुत्रं] अनुजिज्ञासिष्यन्-न्ती-ती; — [शतं] [5]अपजानानः,[C] [सर्पिषो] [6]जानानः, [शतं] [7]सञ्जानानः, [सहस्रं] प्रतिजानानः, [गां] [8]जानानः, [स्वां गां] [9]जानानः, ज्ञापयमानः-ज्ञपयमानः, जिज्ञपयिषमाणः-ज्ञीप्समानः, [धर्मं] [10]जिज्ञासमानः,[D] [शतं]

---

1. 'क्र्यादिभ्यः—' (3-1-81) इति श्ना विकरणप्रत्ययः। ''ज्ञाजनोर्जा' (7-3-79) इति जादेशे, 'श्नाऽभ्यस्तयोः—' (6-4-112) इत्याकारलोपे नुमि च रूपम्। अस्य प्वादित्वेऽपि 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वो न, 'जा' इति दीर्घादेशविधानसामर्थ्यात्। एवं जानानः इत्यत्रापि प्रक्रिया ज्ञेया।
2. 'संप्रतिभ्यामनाध्याने' (1-3-46) इत्यत्र 'अनाध्याने' इत्युक्तत्वात्, प्रकृते शानज् न। आध्यानम्=उत्कण्ठापूर्वकं स्मरणम्।
3. 'विभाषोपपदेन प्रतीयमाने' (1-3-77) इत्यत्र शानचो विकल्पितत्वात्, पक्षे शता भवति।
4. 'ज्ञाश्रुस्मृदृशां सनः' (1-3-57) इति विहितस्य शानचोऽनुपूर्वके सन्नन्ते 'नानोर्ज्ञः' (1-3-58) इति निषेधात् शता भवति।
5. 'अपह्नवे ज्ञः' (1-3-44) इति जानातेः शानच्। शतं अपलपत इत्यर्थः।
6. 'अकर्मकाच्च' (1-3-45) इत्यात्मनेपदं शानच्। सर्पिषोपायेन प्रवर्तत इत्यर्थः। 'ज्ञोऽविदर्थस्य करणे' (2-3-51) इति सूत्रेण, करणस्य शेषत्वेन विवक्षितत्वे षष्ठी।
7. 'संप्रतिभ्यामनाध्याने' (1-3-46) इति शानच्। शतम् अपेक्षमाणः, सहस्रम् अङ्गीकुर्वाणः इति क्रमेणार्थः।
8. 'अनुपसर्गाज्ज्ञः' (1-3-76) इति कर्त्रभिप्राये शानच्। उपसर्गसमभिव्याहारे तु प्रतिजानन् इत्येव भवति।
9. 'विभाषोपपदेन प्रतीयमाने' (1-3-77) इति शानज्विकल्पः।
10. 'ज्ञाश्रुस्मृदृशां सनः' (1-3-57) इति सन्नन्तात् शानच्।

A. 'जानन् अनादिविहितानपराधवर्गान् स्वामिन् भयात् किमपि वक्तुमहं न शक्तः।' वरदराजपञ्चाशति 3.

B. 'अनुजिज्ञासतेवाथ लङ्कादर्शनमिन्दुना।' भ. का. 8. 35.

C. 'आत्मानमपजानानः शशमात्रोऽनयद् दिनम्।
ज्ञास्ये रात्राविति प्राज्ञः प्रत्यज्ञास्त क्रियापटुः॥' भ. का. 8.26.

D. 'प्रेम जिज्ञासमानाभ्यः ताभ्योऽशप्सत कामिनः॥' भ. का. 8.33.